# संस्कृतवार्ता:

दिनाङ्क: - 30/12/2024 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

मुख्यवार्ताः

- भारतीय-अन्तरिक्ष-अनुसंधानसङ्घठनम् अद्य रात्रौ श्रीहरिकोटातः उपग्रहद्वयं प्रक्षेपयिष्यति।
- भारतेन अत्युत्तम-लक्ष्यं सम्प्राप्य वैदेशिक-मुद्रा-विनिमय-कोश: सप्तशत-बिलियन-यू.एस.-डॉलर-परिमित: सञ्जात: अनेनैव सह वैश्विकस्तरे भारतस्य स्थानं चतुर्थं सञ्जातम्।
- भारतीय-ऋतु-विज्ञान-विभागेन अद्य श्वश्च जम्मूकश्मीर-हिमाचलप्रदेशयो: शीतप्रकोप: अनुमानित:।
- क्रिकेट-निकषस्पर्धायां भारतीयदलं पराभूय चतुरशीत्यधिकैकशतधावनाङ्क: अष्ट्रेलिया-देशेन जयो लब्ध:।
- हॉकी-इण्डिया-लीग इत्याख्यायां क्रीडामालायां राऊरकेलाया: बिरसामुण्डा-हॉकी-क्रीडाङ्गणे अद्य संध्यायां यू.पी. रूद्राज् इति दलस्य साम्मुख्यं वेदान्त-कलिंगा-लांसर्स इति दलेन सह भविष्यति।

-----------------------------------------

भारतीय-अन्तरिक्ष-अनुसन्धानसङ्घटनम्

भारतीय-अन्तरिक्ष-अनुसन्धानसङ्घटनम् अद्य रात्रौ श्रीहरिकोटातः उपग्रहद्वयं प्रक्षेपयिष्यति। यद्धि अन्तरिक्षयानानां डॉर्किंग् इति संयोजनं अनडॉर्किंग् इति वियोजनं करिष्यति। येन भारतदेश: विश्वस्य चतुर्थः देशः भविष्यति यो हि उपलब्धिम् इमं प्राप्तवान्। इस्रो इत्यस्य (पीएसएलवी) इति वॉरहॉर्स-रॉकेट-पोलर इति उपग्रहप्रक्षेपणयानं उपग्रहद्वयं एसडीएक्स01 एसडीएक्स02 इति षट्सप्तत्यधिक-चतुश्शतं कि.मी. परिमितायां

वर्तुलाकार-कक्षायां स्थापयिष्यति। स्पेडेक्स इति अभियानं भारतस्य भविष्यत्कालिकानाम् अन्तरिक्ष-अन्वेषण-प्रयासानां कृते आधारशिलात्वेन भविष्यति इति अपेक्षा अस्ति। 'भारतीया: चन्द्रमसि' इति लक्ष्यमधिकृत्य भारतीय-अन्तरिक्ष-स्थानकं चन्द्रमस: अन्तरिक्षयात्रिणः अवरोहणे अपि समर्था: भविष्यन्ति इत्यपेक्षते। केवलं अमेरिका- रूस-चीनदेशाः एव अन्तरिक्षडॉकिंग इत्यस्यां प्रौद्योगिक्यां निपुणतां प्राप्तवन्तः । अभियानस्यास्य मुख्य-उद्देश्यं अन्तरिक्षयानेषु विद्युत्शक्तिहस्तान्तरणस्य प्रदर्शनमपि वर्तते।

---

## भारतस्य वैश्विकी वृद्धि:

भारतेन अत्युत्तम-लक्ष्यं सम्प्राप्य वैदेशिक-मुद्राविनिमय-कोश: सप्तशत-बिलियन -यू.एस. डॉलर-परिमित: सञ्जात:। अनेनैव सह वैश्विकस्तरे भारतस्य स्थानं चतुर्थं सञ्जातम्। आहत्य गतदशाब्दे चतुर्दशत: चतुर्विंशति:काले प्रत्यक्ष-वैदेशिकविनिवेश: प्रायश: नवोत्तर-सप्तशत बिलियन डॉलरात्मकस्य सञ्जातोऽस्ति। अस्मत्वार्ताहरेण प्रोक्तं यत् वैश्विक-प्रतिस्पर्धीति सूचकाङ्के चतुर्दशोत्तर-द्विसहस्रतमे वर्षे भारतस्य स्थानं यत्र एकसप्तितितमम् आसीत् तत्रैव अष्टादशोत्तर-द्विसहस्रततमे वर्षे स्थानमिदं वरीवर्ध्य एकोन-चत्वारिंशत्तमम् अभवत्। इदं हि आधारभूत-संरचनां आपणस्य स्थितिं, नवाचारे वृद्धिश्च दर्शयति।

---

## निर्मला पूर्वोपवेशनम्

केन्द्रीयवित्तमन्त्री निर्मला सीतारामन् इत्येषा अद्य नवदिल्ल्याम् उद्योग-प्रतिनिधिभि: सह आगामिन: आय-व्यय-सङ्कल्पना-प्रपत्रात् पूर्वं पञ्चमस्य परामर्शपूर्वकस्य उपवेशनस्य अध्यक्षतां कृतवती। एतस्मिन् विहितोपवेशने वित्त-निवेश-सार्वजनिक-परिसम्पत्तिप्रबन्धनानि समेत्य अनेकेषां विभागानां सचिवा: उद्योग-आन्तरिक-व्यापार-संवर्धन-विभागस्य केन्द्रप्रशासनस्य च मुख्यार्थिक-परामर्शदा: च सहभागं कृतवन्त:। आगामिने वित्तवर्षाय केन्द्रीय- आय-व्यय-सङ्कल्पना प्रपत्रं पञ्चविंशत्यधिक-द्विसहस्रतमे वर्षे संसदि प्रस्तोष्यते इति आशास्यते। एतद्धि वित्तमन्त्रिण: निर्मलासीतारामन् इत्येतस्या: नैरन्तर्येण अष्टमम् आयव्ययप्रपत्रं भविष्यति।

---

## राष्ट्रिकैडेटकोर इति शिबिरम्

राष्ट्रिय-कैडेट-कोर इत्यस्य पञ्चविंशत्यधिक-द्विसहस्रतमं गणतन्त्र-दिवस-शिबिरम् अद्य नवदिल्ल्या: करिअप्पा-परेड-ग्राउण्ड इत्यत्र सर्वधर्मपूजया सह समारब्धम्। एकमासपर्यन्तं प्रचल्यमाने एतस्मिन् शिबिरे समेषाम् अष्टाविंशति-राज्यानाम् अष्ट-केन्द्रशासितप्रदेशानाञ्च आहत्य एकषष्ट्यधिकत्रिशतोत्तर-द्विसहस्र-सङ्ख्यका: कैडेट इति स्वयंसेविन: प्रशिक्षव: भागं गृह्णन्ति। येषु सप्तदशाधिक-नवशत-बालिका:अपि सोत्साहं भागं स्वीकुर्वन्ति अस्य गणतन्त्रदिवसशिबिरस्य मूलोद्देश्यं सहभागिषु कैडेट इत्येतेषु प्रशिक्षार्थिषु देशभक्ते: अनुशासनस्य नेतृत्वगुणस्य च गहनतया प्रवर्तनमिति वर्तते। अयं वार्षिक-कार्यक्रम: कैडेट्-इत्येतेषां प्रशिक्षणार्थं सांस्कृतिक-क्रियाकलापेषु समाजसेवा-उपक्रमेषु च भागं ग्रहीतुं बहुमूल्ययुतान् अवसरान् प्रदातुं मञ्चत्वेनापि कार्यं करोति येन हि ऐक्यस्य गौरवस्य च पोषणं भवति।

---------------------------------------------

## अमितशाहः -गुजरातयात्रा

केन्द्रीयगृहमन्त्री अमितशाहः अद्य गुजरातराज्यस्य द्विदिवसीय-यात्रारतोऽस्ति। अद्य श्रीशाहः गुजरातस्य वलसाड-जनपदस्य श्रीधरमपुरतीर्थे श्रीमद्राज-चन्द्रमिशन-इत्यस्य वार्षिकोत्सवस्य समापनसमारोहावधौ महामस्तकाभिषेकसमारोहे भागं गृहीतवान्। एतस्मिन् समारोहे गुजरातस्य वित्तोर्जा-मन्त्री कनुभाईदेसाई गृहराज्यमन्त्री हर्षसंघवी च सम्मिलतौ अभवताम्।

---------------------------------------------

## जयशङ्कर – कतरदेश:

विदेशमन्त्री डॉ. एस्. जयशङ्करः अद्यारभ्य कतरदेशस्य त्रिदिवसीय- आधिकारिकयात्रायां भविष्यति। यात्रावधौ असौ कतरदेशस्य प्रधानमन्त्रिणा विदेशमन्त्रिणा च शेख-मोहम्मदबिन-अब्दुलरहमान-बिन-जसीम-अलथानी इत्यनेन सह मिलिष्यति। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् अनया यात्रया द्वयोः देशयोः द्विपक्षीयसम्बन्धेषु विविधविषयेषु च समीक्षा सुनिश्चितास्ति। यत्र राजनीति-व्यापार-निवेश-ऊर्जा-सुरक्षा-संस्कृतिभि: सह क्षेत्रीया: अन्ताराष्ट्रिया: च विविधाः पक्षाः सन्निहिताः सन्ति।

---------------------------------------------

## ऋतुविज्ञानम्

भारतीय-ऋतु-विज्ञान-विभागेन अद्य श्वश्च जम्मूकश्मीर-हिमाचलप्रदेशयो: शीतप्रकोप: अनुमानित:। आकाशवाण्या सह विशिष्टे संवादे ऋतुविज्ञानविभागस्य वरिष्ठ: वैज्ञानिक: डॉ. सोमा-सेनरॉय सूचितवती यत् अद्य पश्चिमोत्तरे भारते कुञ्झटिका सम्भाविता अपरत्र तटीयतमिलनाडौ तीव्रवृष्टि: अनुमानितास्ति। अत्रावधौ उत्तरप्रदेशे आगामिषु पञ्चसु दिवसेषु न्यूनतम-तापमाने षड्डिग्रीमितं यावत् न्यूनता आगन्तुं शक्यते। तत्रैव, पञ्जाब-हरियाणा-चण्डीगढ-दिल्ली-राजस्थान-राज्येषु आगामिनं दिनत्रयं यावत् न्यूनतम-तापमाने चत्वारिडिग्री-सेल्सियस-मितं यावत् अपचिति: भवितुं शक्यते इति सम्भाव्यते।

---------------------------------------------

## क्रिकेट-क्रीडा

क्रिकेट-निकषस्पर्धायां भारतीयदलं पराभूय चतुरशीत्यधिकैकशतधावनाङ्कै: ऑष्ट्रेलिया-देशेन जयो लब्ध:। चतुर्थेयं बॉर्डर-गावस्कर-ट्रॉफी इत्याख्या निकषस्पर्धा ऑस्ट्रेलियाया: मेलबर्न-नगरे क्रीड्यमानासीत् यत्र भारतीयदलं पञ्चपञ्चाशदुत्तरैकशतधावनाङ्कान् एव समर्जितवत्। अद्य अन्तिमे पञ्चमे च दिवसे भारतीयदलेन जयार्थं चत्वारिंशदधिक-त्रिशतधावनाङ्का: योजनीया: आसन्। यशस्वीजायसवाल: सर्वाधिकतया चतुरशीति: धावनाङ्कान् अयोजयत्। ऑस्ट्रेलियापक्षतश्च पेट्-कमिंस: स्कॉट-बॉलेन्डश्च त्रि-त्रि इति क्रमेण षड्क्रीडकान् पातितवन्तौ। अग्रिमा अन्तिमा च निकषस्पर्धा सिडनीनगरे क्रीडिष्यते।

---------------------------------------------

## हॉकी-क्रीडा

हॉकी-इण्डिया-लीग इत्याख्यायां क्रीडामालायां राऊरकेलाया: बिरसामुण्डा-हॉकी-क्रीडाङ्गणे अद्य संध्यायां यू.पी. रूद्राज् इति दलस्य साम्मुख्यं वेदान्त-कलिंगा-लांसर्स इति दलेन सह भविष्यति। क्रीडारम्भ: अस्मात् कश्चित्कालानन्तरं सपाद-अष्टवादने भविष्यति। गतरात्रौ सूरमा-हॉकी-क्लबाख्येन दलेन तमिलानाडु-ड्रेगन्स इति दलं पराजितम्। ह्य: दिवसारम्भे च श्राची-रथ-बेंगॉल-टाइगर्स इतिदलेन हैदराबादतूफान इति दलं पराजितम्।

।।इति वार्ता:।।